"रंच: संघो सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य ॥")

रच, तु क ग्रन्थाम्। इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट्।) रचयति। इति दुर्गादासः ॥

रचनं, क्ली, (रचि+भावे ल्युट्।) निर्म्माणम्। ग्रन्थनम्। यथा, जयदेवः। १।४।

"वाचः पल्लवय उमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविः
क्ष्मापतिः ॥"

रचना, स्त्री, (रच्यते इति। रच+णिच्+"ण्यास-श्रन्थो युच्।" ३।३।१०७। इति युच्।) कुसुमप्रकारादेः पत्रावल्यादेश्च रचनम्। तत्पर्य्यायः। परिस्पन्दः २। इत्यमरः। २।६।१३७॥ परिस्यन्दः ३। इति भरतः ॥ (यथा, साहित्यदर्पणे। ३। १४६।

"भूषाणामर्द्धरचना वृथा विश्वगवेक्षणम्।
रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके ॥")

यथाक्रमेण स्थापनम्। तत्पर्य्यायः। निवेशः २ स्थितिः ३। इति हेमचन्द्रः। ३। ४११॥ (यथा, महाभारते। ८। ४६। १०।

"दृष्ट्वा व्यूहस्य रचनामर्ज्जुनस्य यथागतः ॥")

निर्म्मितिः। कृतिः। यथा,—

"असाधारणचमत्कारकारिणी रचना हि निर्म्मितिः ॥" इत्यलङ्कारकौस्तुभे १ किरणः ॥

तत्पर्य्यायः। सन्दर्भः २ गुम्फः ३ सन्थनम् ४। ग्रन्थनम् ५। इति हेमचन्द्रः। ३। ३१७॥ (उद्यमः। यथा, श्रीमद्भागवते। ३। ६। १०।

"दैवाहतार्थरचना ऋषयोऽपि देव
युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥"

"दैवेनाहताः सर्व्वतः प्रतिहताः अर्थानां रचना अर्थार्थोद्यमाः येषाम्।" इति तट्टीकायां श्रीधरस्वामी ॥ रचयतीति। रचि+युः। टाप्। विश्वकर्म्मणो भार्य्या। यथा, श्रीमद्भागवते। ६। ६। ४४।

"त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका।
सन्निवेशस्तयोर्ज्जज्ञे विश्वरूपश्च वीर्य्यवान् ॥")

रचितः, त्रि, कृतः। रचधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः। यथा,—

"शिरः पद्मश्रेणीरचितचरणाम्भोरुहवलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्ज्जितमिदम् ॥"
इति पुष्पदन्तकृतस्तुतिः ॥

रजं, क्ली, (रञ्जयतीति। रञ्ज+अच्। निपातनात् सिद्धम्।) स्त्रीकुसुमम्। इति शब्दरत्नावली ॥

रजः, पुं, (रञ्जयतीति। रन्ज्+अच्! निपातनान्नलोपः।) परागः। (यथा, गो० रामायणे। ३। ७६। २६।

"पद्मपुष्परजोमिश्रो वृक्षान्तरविनिःसृतः।
निश्वास इव सीताया वायुर्वाति मनोरमः ॥")

रेणुः। ("अर्थाः पादरजोपमाः।" इति उज्ज्वलदत्तः। ४। २१६॥) गुणभेदः। आर्त्तवम्। इति नान्तवर्गे शब्दरत्नावली ॥ (स्कन्दस्य सेनाविशेषः। यथा, महाभारते। ६। ४५। ७१।

"इक्ष्वाकुः सुबाहुश्च रजः कोकिलकस्तथा ॥"

विरजपुत्त्रः। यथा, विष्णुपुराणे। २। १। ४०।

"त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः ॥"

वशिष्ठपुत्त्रः ऋषिभेदः। यथा, विष्णुपुराणे। १। १०। १३।

"ऊर्ज्जायान्तु वशिष्ठस्य सप्ताजायन्त वै सुताः।
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ॥")

रजः [स्] क्ली, (रज्यते रजतीति। रन्ज्+"भूरञ्जिभ्यां कित्।" उणा०४। २१६। इत्यसुन्।) स्त्रीणां मासि मासि योनिनिःसृतरक्तम्। तत्पर्य्यायः। पुष्पम् २ आर्त्तवम् ३। इत्यमरः। २। ६। २१॥ ऋतुः ४ कुसुमम् ५ रजम् ६। इति शब्दरत्नावली ॥ (यथा, मनौ। ५। १०८।

"रजसा स्त्री मनोदुष्टा सन्न्यासेन द्विजोत्तमः ॥"

अस्य लक्षणं यथा,—

"रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"

"नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति।" इति सुश्रुते सूत्रस्थाने १४ अध्यायः ॥

"मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम्।
वत्सराद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"
इति वाभटे शारीरस्थाने प्रथमेऽध्याये ॥)

प्रकृतेर्गुणविशेषः। तत्तु रागद्वेषात्मकं दुःखहेतुः। रजोऽदन्तः पुंलिङ्गोऽपि। यथा,—

"रजोऽयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु।"
इत्यमरदत्तः। इति भरतः ॥

महाभारतमते दुःखजनकगुणः। तस्य धर्म्मः कामः क्रोधः लोभः मानः दर्पश्च। इति मोक्षधर्म्मः ॥

"तृष्णा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः
स्मृताः ॥"

अभिसंरम्भो द्वेषाभिनिवेशः। इत्याश्वमेधिकपर्व्व ॥ अपि च।

"काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥"
इति श्रीभगवद्गीतायाम्। ३ अध्यायः ॥

अपि च।

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥"
"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय! कर्म्मसङ्गेन देहिनम् ॥"
"सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"
"लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ! ॥"
"कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम्।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"
इति श्रीभगवद्गीतायाम्। १४ अध्यायः ॥

"सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतश्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च।
तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः ॥
यदा कर्म्मसु काम्येषु शक्तिर्यशसि देहिनाम्।
तदा त्रेता रजोवृद्धिरिति जानीहि शौनक ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः।
कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः ॥
यदा सदानृतं तन्द्री निद्रा हिंसादिसाधनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"
इति गारुड़े २२७ अध्यायः ॥

परागः। इति मेदिनी। से, ३२॥ (यथा, भागवते। ४। २४। २२।

"पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवम् ॥")

रेणुः। अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ॥ (यथा, माघे। २। ४६।

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥")

निषिद्धानिषिद्धरजो यथा,—

"आयुष्कामो न सेवेत तथा सम्मार्ज्जनीरजः।
तथाश्वरथधान्यानां गवाञ्चैव रजः शुभम् ॥
अशुभञ्च विजानीयात् खरोष्ट्राजाविकेषु च।
गवां रजो धान्यरजः पुत्त्रस्याङ्गभवं रजः ॥
एतद्रजो महाशस्तं महापातकनाशनम्।
अजारजः खररजो यत्तु सम्मार्ज्जनीरजः ॥
एतद्रजो महापापं महाकिल्विषकारणम् ॥"
इति गारुड़े ११४ अध्यायः ॥

(रात्रिः। इति निघण्टुः। १। ७॥ उदकम्। यथा, ऋग्वेदे। १। ५६। ५।

"वियत्तिरोधरणमच्युतं रजोतिष्ठिपो दिव
आतासु बर्हणा।"

'रज उदकम्।' इति तद्भाष्ये सायणः ॥ भुवनम्। यथा, तत्रैव। १०। ८२। ४।

"असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि।"

"रजसि लोके।" इति तद्भाष्ये सायणः ॥ ज्योतिः। यथा, तत्रैव। १०। ३२। २।

"वीन्द्र यासि दिव्यानि रोचना विपार्थिवानि
रजसा पुरुष्टुत।"

"रजसा आत्मीयेन ज्योतिषा। विद्युल्लक्षणेन यद्वा रजःशब्दाख्यस आकारः पार्थिवान् लोकान्।" इति तद्भाष्ये सायणः ॥)